IJCRT.ORG ISSN : 2320-2882
INTERNATIONAL JOURNAL OF CREATIVE RESEARCH THOUGHTS (IJCRT)
An International Open Access, Peer-reviewed, Refereed Journal

# अद्वैतसिद्धौ दृश्यत्वादिहेतुविमर्शः

मानवेन्द्र मण्डल
विद्यावारिधिच्छात्रः(अद्वैतवेदान्तविभागीयः)
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरूपतिः,

मायाकल्पितमातृता मुखमृषाद्वैतप्रपञ्चाश्रयः
सत्यज्ञानसुखात्मकः श्रुतिशिखोत्थाखण्डधीगोचरः।
मिथ्याबन्धविधुननेन परमानन्दैकतानात्मकम्
मोक्षं प्राप्त इव स्वयं विजयते विष्णुर्विकल्पोज्झितः।।

अद्वैतशिरोमणिभिः श्रीमन्तैः मधुसूदनसरस्वत्याचर्यैः अद्वैतसिद्धिनामके स्वग्रन्थे मिथ्यात्वसिद्धिपूर्वकाद्वैतापत्तिं साध्यते। विप्रतिपत्तिविचारानन्तरं पञ्चमिथ्यात्वविषये अवलोक्यते। प्रपञ्चमिथ्यात्वानुमानप्रयोगप्रसङ्गे एकविशेष्यकपरस्परविरुद्धधर्मप्रकारबोधजनक-वाक्यरूप विप्रतिपत्तेः उपयोगीता सिद्ध्यनन्तरं प्राचीनब्रह्मवादीनः ग्रन्थयन्ति **विमतं मिथ्या दृश्यत्वात्, जडत्वात्, परिच्छिन्नत्वात् शुक्तरूप्यवदिति**[१]**।** अत्र विमतं नामो मिथ्यात्वमिथ्यात्वाभावरूपकोटियुगलावगाही ज्ञानविशेषविषयः विप्रतिपत्तिजन्यसंशय-विशेष्यः, मिथ्या वक्ष्यमाणलक्षणकमिथ्यात्ववत् दृश्यत्वात् जडत्वात् परिच्छिन्नत्वात् शुक्तिरूप्यवत्, शुक्तौ कल्पितरजतस्य अनिर्वचनीयरूप्यवत् इति।

**<u>दृश्यत्वहेतूपपत्तिः-</u>**

किमिदं दृश्यत्वम् इति आक्षेपे-

वृत्तिव्याप्यत्वं दृश्यत्वं, फलव्याप्यत्वं, साधारणं, कदाचिद् कथञ्चित् विषयत्वं, स्वव्यवहारे स्वातिरिक्तसंविदन्तरापेक्षानियतिः, अस्वप्रकाशत्वं वा मिथ्यात्वमिति प्रश्ने विचारः आरभ्यते-

अखण्डाकारचित्तवृत्तेः विषयः भवति आत्मा। परन्तु आत्माभिन्ने अन्यत्र दृश्यत्वादौ साध्यनिर्णयः भवति चेत् व्यभिचारदोषः आयाति। अतः वृत्तिव्याप्यत्वं दृश्यत्वमिति शङ्का नानुचिता।

फलव्याप्यत्वं दृश्यत्वम् इति चेत् नित्यातीन्द्रिये गुरुत्वादौ किञ्च साक्षिभास्य शुक्तिरुप्यादौ फलव्याप्यत्वाभावात् क्रमशः भागासिद्धिदोषः, एवञ्च दृष्टान्ते साधनविकलता दोषश्च भवति।

साधारणं वा दृश्यत्वम् इत्यपि लक्षणीभूतं न भवति, यतोहि अन्यतरवत्ववृत्तिव्याप्यत्वस्य स्वीकारात् प्रथमपक्षवत् अस्मिन् पक्षेऽपि आत्मनि व्याभिचारदोषः आगच्छति। अतः नानुचिता शङ्का।

[1] □.□□

**ब्रह्मपूर्वं न ज्ञातम् इदानीं वेदान्तेन ज्ञातम्**[2] इति प्रसङ्गात् ब्रह्मैव परमालोच्यम्, दृश्यत्वहेतोः विषयत्वं भवति चेत् आत्मनि व्याभिचारदोषः, अतः नास्ति शङ्कायाः उपपत्तिः।

ब्रह्मणि अद्वितीयत्वादिविशिष्टविमर्शदर्शनात् **संविदेका**[3] इति प्रयोगात् दृश्यत्वादौ स्वव्यवहारात् स्वातिरिक्तसंविदन्तरापेक्षानियतिरप्रयोगात् आत्मनि व्यभिचारदोषः भवति। अतः एषा शङ्का असमिचीना।

अस्वप्रकाशत्वरूपदृश्यत्वम् इत्यपि न समिचीनम्, यतोहि स्वप्रकाशत्वस्य अर्थः भवति अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वम् इति। अस्वप्रकाशः तु अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यतात्यन्ताभावः, अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वाभावरूपः, शुक्तिरुप्यादेः अप्यपरोक्षव्यवहारयोग्यत्वेन साधनवैकल्याद्।

समाधानत्वेन उच्यते पूर्वपक्षस्य आशङ्का नानुचिता केवलं फलव्याप्यत्वपक्षं विहाय अन्यत् सर्वं ब्रह्मणि सङ्गच्छते। पूर्वपक्षानुसारेण ब्रह्मणि वृत्तिव्याप्यत्वं नास्ति चेत् वेदान्तवृत्तिजन्यं ब्रह्म इत्यत्र वैयर्थ्यदोषः आयाति। किञ्च शुद्धं ब्रह्मणि वृत्तिव्याप्यत्वं नास्ति दृश्यत्वाभावात्, केवलं वेदान्तजन्यपोहिते ब्रह्मणि एव सङ्गच्छते। उपहितब्रह्मणि ब्रह्मोपाधिसहितं तिष्ठति, अनुपहिते नास्ति उपाधिधर्मः इत्यर्थः।

शुद्धब्रह्मणि दृश्यत्वं निषिध्यते सिद्धान्तिभिः, अतः तैः शुद्धब्रह्मणि ज्ञेयत्वरूपम् अङ्गीक्रियते एवञ्च ब्रह्मणि ज्ञेयत्वधर्मात् व्यभिचारदोषः भवति। ब्रह्मणि दृश्यत्वं नास्ति इति वक्तुं न शक्यते, शुद्धं स्वप्रकाशं भवति चेत् शुद्धस्य अप्रकाशत्वे ब्रह्मणः स्वप्रकाशत्वं न सिद्ध्यति।

ब्रह्मणि शुद्धनिष्ठवृत्तिविषयता अस्ति, परन्तु शुद्धत्वं नास्ति। अशुद्धत्वम् अस्वप्रकाशत्वस्य व्यापकं वर्तते, शुद्धत्वं स्वप्रकाशस्य अतः शुद्धम् इति पदप्रयोगेन स्वप्रकाशं पर्यवसितम्, अस्वप्रकाशत्वस्य निवृत्तिः च भवति।

शुद्धपदस्य अभिधालक्षणया च ब्रह्मणः प्रकाशः न भवति, अतः शुद्धपदस्य प्रयोगः व्यर्थः।

शुद्धौ वृत्तिव्याप्यता नास्ति अतः अर्थसिद्धिः **शुद्धं न दृश्यं न मिथ्या**[4] इति अतः अशुद्धत्वं दृश्यत्वस्य मिथ्यात्वस्य च व्यपकं भवति। तस्मात् शुद्धौ अशुद्धरूपव्यापकस्याभावे सति दृश्यत्व-मिथ्यात्वस्याप्यभावः पर्यवसितः भवति।

**विष्णवे शिपिविष्टाय** किञ्च **अग्निषोमीयं पशुमालभेत**[5] इत्यत्रादौ रश्मिविशिष्टविष्णुः एवञ्च अग्निषोमः देवता मन्यते, न तु रश्मिविशिष्टस्थले देवताबुद्धिः। तद्वदेव विशेष्यविशेषण वृत्तिविषयत्वं न तु तत् शुद्धं ब्रह्मणि। अतः नास्ति व्याभिचारदोषः। पूर्वपक्षिभिः उच्यते केवलं विशेष्ये वृत्तिविषयत्वं नास्ति, केवलं विशेषणेऽपि वृत्तिविषयत्वं नास्ति। अतः एकस्मिन् भागे वृत्तिव्याप्यत्वरूपदृश्यत्वहेत्वाभावात् भागासिद्धिदोषः भवति।

तदोच्यते विशेष्यतापन्नब्रह्मणि वृत्तिविषयत्वसत्वेऽपि व्याभिचारदोषः नायाति, विशेष्यतापन्नब्रह्म मिथ्या इत्यस्मात्। किञ्च उपाधिविशिष्टब्रह्मणि वृत्तिः स्वीकृता चेत् उपधेये शुद्धब्रह्मणि वृत्तिविषयत्वं न सम्भवति, उपाधिविशिष्टब्रह्मणः मिथ्यात्वस्वीकारात्। यदि उपधेयब्रह्मणि स्वीक्रियते तर्हि उपधेयस्वरूपं ब्रह्माऽपि मिथ्या भवति। तस्मात् अनया रीत्या

---

2 □.□□.

3 □□□□□.

4 □.□□.

5 □□.□.२ .७ ० २

भागासिद्धिदोषप्रसङ्गः नायाति। विशिष्टविषयकज्ञाने विशेषणविषयता नास्ति परन्तु तद्विपरीते विशेषणविषयकज्ञाने विशेषणविषयता तु तिष्ठत्यतः नास्ति भागासिद्धिदोषः।

वेदान्तजन्याखण्डाकारवृत्तेः विषयः उपहितं ब्रह्मेति स्वीकारे उक्तवृत्तिकाले उक्तवृत्त्यतिरिक्तोपाध्यभावे उपाधित्वस्वीकारेऽपि स्वविषयकत्वस्यापत्तिर्भवति। यतोहि शाब्दबोधे शब्दभिन्नपदार्थस्यानुपपत्तिः भवत्यतः अनुपस्थितवृत्तेः भानं नास्ति। महावाक्यादौ अपि अज्ञानम् अज्ञानप्रयुक्तपदस्यापि निर्वृत्तिः न भवति। पुनः यदि भिन्नविषयकवृत्तिरज्ञानम् अज्ञानकार्यनिवर्तकं च मन्यते तर्हि **अहमज्ञः** इत्यत्र एषः घटः इत्याद्यज्ञानम् अज्ञानकार्यनिर्वृत्तिं च भवति।

तत्रोच्यते शङ्केयम् अयुक्ता, वेदान्तवाक्यजन्याखण्डाकारवृत्तिविषये अप्रविष्टा वृत्तिः ब्रह्मोपहितत्वं जनयति। कल्पतरुकारः वदति शुद्धब्रह्मपोहितवृत्तिः स्वेतरोपाधिनां निवृत्तिहेतुभूत्वा तिष्ठति। वृत्तेः विषयं विना नास्ति प्रकाशः यथात्र शुद्धब्रह्मवृत्तिविषयः। अत्र केवलं वृत्तिः न प्रकाशते अपि तु शुद्धब्रह्मपोहितवृत्तिः प्रकाशते। वृत्तिः स्वयं न प्रकाश्यमानं भवति।

स्वप्रकाशकं ब्रह्म काल्पनिकम् उत पारमार्थिकमित्यत्र आदिमं स्वीक्रियते चेत् ॣजीवो न ब्रह्म, इशो न ब्रह्म इत्यादि रूपेण शुद्धब्रह्मणि व्याभिचारदोषः आयाति, एवञ्च द्वितीयम् अद्वैतीभिः नाङ्गीक्रियते।

तत्रेदं समाधानं तावत्, आदिमं नासमिचीनं यतो हि ब्रह्मप्रतियोगिकभेदः अन्यानधीनापरोक्षत्वरूपधर्मद्वारा निरुपितः नास्ति, अपि तु जीवत्वेश्वरत्वादिअन्यधर्मैव शुद्धचिद्रुपब्रह्मभेदस्य अनुयोगीतावच्छेदकं वर्तते। किञ्च चित्सुखाचार्यस्य अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वाभावत्वं दृश्यत्वमिति।

**जडत्वहेतूपपत्तिः-**

जडत्वं नामो किम् अज्ञातृत्वम् अज्ञानत्वम् अनात्मत्वं वेति –

न सिद्ध्यति प्रथमः, ज्ञातृभिन्ने देहभिन्नशुद्धात्मनि जडत्वहेतुः न युक्तः व्याभिचारदोषादिति।

अज्ञानत्वमपि असमिचीनं, यतोहि वृत्त्युपहितं चैतन्यं ज्ञानम् एवञ्च ज्ञानभिन्नत्वमज्ञाने चैतन्यभिन्नवृत्तौ जडत्वोपपत्तिः स्वीक्रियते चेत् चैतन्येऽपि व्याभिचारदोषः आयाति चैतन्यं वृत्त्युपरक्तं भवतीति कारणात्।

आत्मत्वस्य निरुपणाभावात् अनात्मत्वं कथं सम्भवति, आत्मत्वावच्छिन्नप्रतियोगिताकभेदनिरुपणमपि न भवति, घटत्वादिवदात्मनि जातित्वम् अपि न, आत्मनः एकत्वात्। जीवात्मा स्वीक्रियते चेत् आत्मत्वभावात् भागासिद्धिदोषः जायते।

तत्र द्वितीयं तृतीयं च नानुचितम्, अज्ञानत्वं जडत्वमिति प्रकरणात्, चिदात्मनः ज्ञानत्वात्, मोक्षदशायां तस्य भावाच्च। शुद्धचैतन्ये ज्ञानभिन्नत्वाभावात् न व्याभिचारदोषः।

यथा विषयाभावे सप्रतियोगीत्वं तथा इच्छायाम् इच्छासमानसत्ताकविषयः,किञ्च ज्ञानेऽपि ज्ञानसत्ताकविषयत्वम् इति। मोक्षे ज्ञानत्वोपलक्षणे विषयाभावत्वात् शुद्धचित्स्वरूपत्वम् असम्भवम्।

ज्ञाननिष्ठविषयत्वसम्बन्धरूपं भवति परन्तु तन्न तात्विकं केवलम् आध्यासिकि भवति, तात्विकसम्बन्धनिरूपणाभावात्। यथा शुक्तौ रजतम्। एवञ्च इच्छादौ अपि सम्बन्धः न तात्विकः। यथा विषयाभावेऽपि ज्ञानं मोक्षे तिष्ठति तथा विषयसम्बन्धाभावोऽपि इच्छाकाले भवति वा –

विषयसत्वाऽभावेऽपि ज्ञानं तिष्ठति। यत्र विषयविषयी च समानं भवति तत्र विषयविषयी चोभयमपि वर्ततेव। ईच्छा उपाधिसमानसत्ताकत्वात् विषयं त्यज्य न तिष्ठति।

मोक्षावस्थायां निर्विषयत्वात् आनन्दप्रकाशस्वरूपमपि न भवति। अतः मोक्षावस्था आनन्दार्थं पुरुषार्थं न उत्पद्यते।

मोक्षकाले आनन्दरूपरेव प्रकाशः तथापि न आनन्दस्य प्रकाशत्वम् अस्ति। सर्वज्ञोपलक्षितज्ञानत्वं मोक्षावस्थायाम् एव भवति। अतः नास्ति ज्ञानत्वहानिः।

मोक्षावस्थायां ज्ञानत्वसत्वेऽपि ज्ञातुरभावात् आत्मस्वरूपज्ञानं न जायते, यथा भोजनादौ इति। यदि ज्ञानस्य अनादित्वात् न ज्ञातुरपेक्षा इति उच्यते तर्हि न समिचीनम्, अनादेः प्रागभावप्रतियोग्यपेक्षात्। अनादिजातेः व्यक्तिरपेक्षा भवति, ॡअस्ति ब्रह्म इत्यादौ कर्तुरपेक्षा यथा। ज्ञाता ज्ञेयत्वसम्भवात् ॡअहं न जानामि इत्यपि न सत्यम्। विवरणाचार्यमतेक्र ॡज्ञातुः अर्थप्रकाशमेव ज्ञानम् इति वर्तते।

एवमुच्यते चेत् न, प्रलयकाले गोत्वादिजातेः व्यक्तेः च अभावत्वेऽपि जातिज्ञानं तिष्ठति। व्यवहारकाले ज्ञातृज्ञेयरूपसत्वेऽपि मोक्षकाले ज्ञातृज्ञेयं विना ज्ञानं जायते। अविद्याया आत्मनः लघुसत्वम् उत्पद्यते।

सज्ञेयत्वं तावत् ज्ञानजन्यत्वम् उत ज्ञेयव्याप्यत्वम् –

परोक्षज्ञाने ईश्वरज्ञाने च ज्ञेयजन्यत्वाभावात् न प्रथमम् उचितम्। कालिकव्याप्तिग्रहणे परोक्षज्ञानादौ व्यभिचारात् न द्वितीयः। दैशिकोऽपि न भवति समानाधिकरण्याभावात्।

ॡयदापरोक्षज्ञानं तदा अर्थः एवंरीत्या **ब्रह्मसाक्षादपरोक्षम्**[६] इति काले आत्मापरोक्षज्ञाने अर्थव्याप्तं भवति।तेन व्यभिचारदोषः उपपद्यते, ईश्वरज्ञाने योगी ज्ञाने च व्याप्यत्वेऽपि व्यापकाभावात्। आत्मस्वरूपे ज्ञाने इन्द्रियजन्यत्वं नास्ति। अतः व्यप्तेः स्वीकारे अपि न भवति।

यस्मिन्काले यस्य विषयस्य अपरोक्षज्ञानं जायते तस्मिन्काले तदेव विद्यमानं भवति। व्यप्तेः अस्वीकारे ॡइदं रजतम् इत्यत्र अन्यथानुपपत्तिना अनिर्वचनीयरजतसिद्धिः न अपि तु, विषयाभावत्वेन अपरोक्षज्ञानोपपत्तिः भवति।

एवं न, अनुव्यवसायेन अनुसन्धानीयमानमिदमवच्छिन्नतादृशचित्तादात्म्यविशिष्ट-रजतनिष्ठत्वेन ज्ञायमानविषयत्वोपपत्तिः। तस्य वैषयिकरजतरुपाश्रयन्तरस्य अनुपपत्तेः प्रतीतिः कालमात्रस्थायी तत्कालोत्पन्नानिर्वचनीयरजतसिद्धिः भवति। अनागतविषयेन सह साक्षीतादात्म्याभावात् अतीतादिविषयकज्ञानम् अपरोक्षं न तत्र व्यभिचारः।

किम् सज्ञातृकत्वम्– ज्ञातृजन्यत्वरूपम्, ज्ञातृव्याप्यत्वरूपम्, ज्ञातृसमवेतत्वरूपम् वा–

न प्रथमः ईश्वरज्ञाननित्यत्वात्, तत्र व्यभिचारदोषः। नद्वितीयः व्यभिचारशङ्का निवर्तकतर्कशून्यतारूपाप्रयोजकत्वात्। एवञ्च न तृतीयः, ज्ञाताजन्यज्ञानं न ज्ञातृसमवेतम् इत्यस्मात्। गुणत्वक्रियात्वाभावादपि द्रव्याश्रयत्वानुमानं न तिष्ठति ज्ञाने।

[6] □.□□.

प्रमा भ्रमश्च इति ज्ञानद्वयं भवतः। आत्मज्ञानं न प्रमात्मकम् अविद्यादिविषयत्वात् तात्विकाभावाच्च।

ईश्वरज्ञानवत्, आत्मनि यत् ज्ञानं तत् प्रमा भ्रमभिन्नं विलक्षणज्ञानस्वरुपम्। ज्ञानपदवाच्यभिन्नम् अज्ञानं चेत् वृत्तिरूपोपाधौ ज्ञानपदवाच्यत्वात् वृत्तिरूपोपाधौ हेत्वाभावात् भागासिद्धिदोषः। घटादौ ज्ञानपदलक्ष्यरुपहेत्वाभावात् स्वरुपासिद्धिदोषः ब्रह्मणि सत्वात् व्यभिचारदोषश्च।

ज्ञानपदजन्यप्रतीतौ विशेष्यम्, तादृशविशेषभिन्नत्वविवक्षायां स्वरूपासिद्धिव्याभिचार-दोषश्च न जायेते।

वास्तविकज्ञानभिन्नत्वं वास्तविकानन्दभिन्नत्वं च नोपपद्यते चेत् काल्पनिकं ज्ञानभिन्नत्वस्य काल्पनिकब्रह्मभिन्नत्वस्य च स्वीकारे व्यभिचारदोषः।

तन्न, भेदस्य विशेषणं धर्मीसमसत्ताकम्, धर्मीसमसत्ताकज्ञानभेदः इति। धर्मीसमसत्ताकानन्दभेदहेतुस्वीकारे न व्यभिचारदोषः जायते।

**परिच्छिन्नत्वहेतूपपत्तिः-**

प्रपञ्चरूपधर्मीणः मिथ्यात्वं साधयितुं या अनुमितिः तत्र परिच्छन्नत्वमपि हेतुः वर्तते। अत्र तत् पदेन परिच्छिन्नत्वस्य ग्रहणं कृतम्। च इति पदेन देशतः कालतो वस्तुतोश्चेति परिच्छिन्नत्वस्य त्रैविध्यत्वम् अवबाधितम्। आदौ तावत् अत्यन्ताभावप्रतियोगीत्वं देशतः परिच्छिन्नत्वम् इति। अर्थात् कस्मिंश्चित् देशे विद्यमानत्वं नामो देशतः परिच्छन्नत्वमिति। ध्वंसप्रतियोगीत्वं तु द्वितीयम्, अर्थात् कस्मिंश्चित्काले विद्यमानत्वं नामो कालतो परिच्छिन्नत्वमिति। वस्तुतः परिच्छिन्नत्वं नामो अन्योन्याभावप्रतियोगीत्वमिति। अर्थात् वस्तुभिः सह तादात्म्यापन्नत्वं नामो परिच्छिन्नत्वम्।

**शङ्का**- एवं प्राप्ते आशङ्क्यते समवायसम्बन्धावच्छिन्नप्रतियोगीताकोत्यन्ताभावः तादृशात्यन्ताभावप्रतियोगीत्वरूपपरिच्छिन्नत्वस्य हेतुत्वम् आत्मनि व्यभिचारदोषेण दूष्यते। यतोहि आकाशादिवत् ब्रह्मऽपि कुत्रापि समवायसम्बन्धेन न तिष्ठिति। नैयायिकानां मते आकाशः ईश्वरादिनि च नित्यद्रव्याणि, परन्तु समवायसम्बन्धेन कुत्रापि न तिष्ठति। तद्वत् आत्मापि तेषां मते समवायसम्बन्धेन कुत्रापि न तिष्ठतीति। यः यस्सम्बन्धेन यस्मिन् न् तिष्ठति सः तेन सम्बन्धेन सह प्रतियोगीताकात्यन्ताभावरूपतया तिष्ठति इत्यर्थः। अतः अत्यन्ताभावप्रतियोगीत्वरूपात्मनि सत्वात् व्याभिचारदोषः।

संयोगसम्बन्धावच्छिन्नप्रतियोगीताकात्यन्ताभावः तादृशात्यन्ताभावप्रतियोगीत्वरूप-परिच्छिन्नत्वस्य हेतुस्वीकारे आकाशादौ हेत्वाभावात् भागासिद्धिदोषः जायते, आकाशादौ विभूत्वस्वीकारात्। सर्वमूर्त्तद्रव्यसंयोगीत्वम् आकाशे वर्तते। अतः घाटाकाशः मठाकाशः इतिवत् आकाशे पृथिव्यप्तेजवायोः संयोगीत्वं स्वीकर्तव्यम्। किञ्च यः यस्मिन् येन सम्बन्धेन तिष्ठति सः तस्मिन् तेन सम्बन्धेन उपपद्यते। अतः संयोगसम्बन्धेन आकाशे सत्वात् अभावः अस्ति इति वक्तुं न शक्यते, एवञ्च आकाशपक्षे भागासिद्धिदोषः भवति। यदि आकाशादौ भागासिद्धिदोषः न स्वीक्रियते तर्हि आत्मनि व्याभिचारदोषस्य उपपत्तिर्जायते।

यदि सर्वमूर्त्तद्रव्यसंयोगाभावः जायते तर्हि ब्रह्मणि व्यभिचारदोषः भवति, अज्ञाने स्वरूपासिद्धिदोषश्च जायते। घटपटादौ सम्बन्धाभावात् पक्षतावच्छेदकावच्छेदेन हेत्वधिकरणता, परन्तु शुद्धब्रह्मणि व्यभिचारदोषः अस्ति, उपहितब्रह्मणि सर्वसम्बन्धित्वसाक्षित्वात्। अतः सर्वसम्बन्धित्वात् अज्ञाने भागासिद्धिदोषः, ध्वसंप्रतियोगीत्वरूपहेतुत्वात् आकाशादौ

भागासिद्धिदोषः, अन्योन्याभावप्रतियोगीत्वरुप परिच्छिन्नत्वहेतुत्वात् आत्मनि व्यभिचारदोषश्च। यतोहि आत्मनि जडनिष्ठात्यन्ताभाव-प्रतियोगीत्वं वर्तते। तदोच्यते इयं नानुचिता यतोहि अत्यन्ताभावे अन्योन्याभावे च प्रतियोगीसमसत्ताकत्वेति विशेषणारोपेण आत्मनि व्यभिचारदोषः निराक्रियते। अज्ञानाकाशादौ च स्वसमानसत्ताकात्यन्ताभावं, अन्योन्याभावञ्च प्रतियोगीत्वात् भागासिद्धिदोषोऽपि न उत्पद्यते। अज्ञानाकाशादौ पृथिव्यप्तोजोवायोः सम्बन्धस्य पारमार्थिकत्वस्वीकारात् अत्यन्ताभावोऽन्योन्याभावयोः न्युनसत्ताकभिन्नं **स्वन्युनसत्ताकमिति** विशेषणं देयम्। अधुना परिच्छिन्नत्वस्य लक्षणम् उच्यते- स्वसमानसत्ताकात्यन्ताभावप्रतियोगीत्वस्वाधिकसत्ता-कत्यन्ताभावप्रतियोगीत्वं वा परिच्छिन्न-त्वम् इति।

ध्वंसप्रतियोगीत्वरुपपरिच्छिन्नत्वस्य आकाशादौ भागासिद्धिदोषः न, **एतस्मादात्मनः आकाशः सम्भूतः**[7] इत्यत्र आत्मनः आकाशः सम्भूतत्वात्। अनया श्रुत्या आत्मनः एव व्यापकत्वं सूचयति। आत्मावत् आकाशस्यापि नित्यत्वं गौणरूपेण स्वीक्रियते, तेन प्रलयपर्यन्तम् आकाशस्य स्थायीभावः स्थीयते। **अतोन्यदार्तम्**[8] इत्यनया ब्रह्मणः एव सर्वगतत्वं नित्यत्वं व्यापकत्वञ्च, तत्भिन्नम् अन्यत् सर्वं नश्यम्। आत्मभिन्नानि सर्वमुपाधिभूतानि भिन्नानि प्रतीयन्ते। केवलं सन् घटः सन् पटः इत्यादिवत् औपाधिक्येन भिद्यते। ब्रह्मणः तु पारमार्थिकतया नास्ति भेदः अतः उभयत्र व्याभिचारदोषः नास्ति।

**शङ्का**- ऌखण्ड गौर्मुण्डो गौः इत्यादौ स्वानुगतप्रतिभासगोत्वादौ गोव्यक्तिकल्पनाभावात् व्याभिचारदोषः आयाति।

तत्रोच्यते उक्तव्याभिचारदोषः न भवति यतोहि ब्रह्मरूपसत्सामान्ये ब्रह्मातिरिक्तस्य गोत्वादिसामान्यस्य स्वीकारः नास्ति। अतः ब्रह्मणि अद्वितीयरूपेण गोव्यक्त्यादीनां कल्पना क्रियते इति हेतोः नास्ति व्यभिचारदोषः। यथा केचन सर्वेषु भिन्नत्वं सास्नादिमत्वं गोर्लक्षणम् इत्येवं मन्यन्ते तथा व्यक्तिविशेषसंसृष्टं सत्सामान्यात् तत्तत् गोव्यक्त्यादीनां व्यञ्जकत्वे अद्वितीयरूपेण सद्ब्रह्मणि एव प्राप्तिरस्ति। घटपटादिसर्वेषाम् अभेदरूपं ब्रह्मणि प्रतीयते। यथा आकाशस्थः चन्द्रः तादात्म्येन जले कल्प्यते।

**शङ्का**- यदा व्यक्तिः ईन्द्रियैः अद्वितीयज्ञानं लभ्यते तदा वृत्तिरहितं तिष्ठति एवञ्च ब्रह्मणि सन् घटः सन् पटः इत्यादिप्रतीतिः भवितुं नार्हति। अतः **घटोऽनित्यः** इत्यादिना घटस्य अनित्यत्वम्, अतः सन् घटः सन् पटः इति घटपटस्य नित्यत्वमङ्गीकर्तव्यम्। राहोः चन्द्रावच्छेदेन सत्यत्वं चेत् अत्र अप्रत्यक्षब्रह्मणः अपि घटपटावच्छेदेन सत्यत्वं प्रत्यक्षत्वम्। तदोच्यते एवं कथनं न समिचीनं यतोहि शब्दावच्छिन्नाकाशादौ अपि श्रवणत्वस्य प्रत्यक्षः जायतेति कारणात्। दूरतादोषवशात् चन्द्रावच्छेदेन राहोः चाक्षुषप्रत्यक्षत्वं भास्वररूपे चन्द्रे स्वीकर्त्तव्यम्।

आशङ्कायामस्यामुच्यते इदं न समिचीनं यतोहि चिद्रुपब्रह्म मूलाज्ञानेन आवृतं नास्ति अपि तु घटावच्छिन्नचैतन्यनिष्ठमूलाज्ञानस्य अवस्था तुलाज्ञानमेव। तुलाज्ञानेनैव चिदंशम् आवृतमस्ति। यदा तुलाज्ञानं नश्यते तदा आवृतभङ्गः दृश्यते एवञ्च सन् घटः सन् पटः इतिवत् प्रतिभासते। इन्द्रियैः तत्तन्मात्रां गृह्यते परन्तु ब्रह्म सर्वेन्द्रियतग्राह्यम्। एवंरीत्या रूपविहीनत्वेऽपि ब्रह्मणः

---

[7] □□.□.

[8] □□□.□.३ .४ .२ .

चाक्षुषप्रत्यक्षाद्यनुपपत्तौ बाधः उपपद्यते। सर्वेन्द्रियाणां विषयत्वं विषयग्राहकत्वं करणावृत्तेः विषयत्वम् च आत्मनः एव। आत्मावच्छेदेन जडस्य अवस्थित्यतः अज्ञानस्य गौणत्वेन जडे व्यवहारः वर्तते।

अतोऽनुभव एवैको विषयज्ञातलक्षणः।
अक्षादीनां स्वतो सिद्धःयत्र तेषां प्रमाणता।।

अज्ञातात्मानं विषयीकरोतीति कारणात् प्रमाणवृत्तौ प्रमाणता स्वीक्रियते, अज्ञातवाधितार्थविषयकत्वं प्रमाणनिष्ठप्रमाणतेत्यस्मात्। शब्दावच्छेदेन आकाशस्य श्रवणत्वम् इति आशङ्कायां ब्रूते स्वभावतः प्रत्यक्षयोग्यनिमित्तावरूद्धयोग्यपदार्थस्यैव अवच्छेदकेन योग्यता सम्पद्यते। अतः चन्द्र सम्बन्धेन राहोः योग्यता दूरतादोषात् सिद्ध्यति। एवंरीत्या ब्रह्मऽपिघटावच्छेदेन प्रत्यक्षसिद्धं भवति। आकाशः स्वभातया प्रत्यक्षावरूद्धः अतः शब्दावच्छेदेन उपपत्तिर्न जायते। सर्वत्र प्रत्यक्षे चक्षुरादेः प्रयोजनं नास्ति। ब्रह्म तु न द्रव्यम्, **अस्थूलम् अणनु अह्रस्वम् अदीर्घम्**[9] इत्यादि श्रुतिभिः ब्रह्मणः द्रव्यरहितत्वं प्रतिसिद्ध्यति। अतः सद्ब्रह्मणः भासमाने नास्ति किञ्चिदपि वैरूद्ध्यम्। अन्युनसत्ताकत्वस्य द्रव्यस्य प्रत्यक्षे चक्षोः रूपादेः वा प्रयोजनं भवति। ब्रह्मणि द्रव्यत्वं न्युनसत्ताकं, चक्षुरादिना ब्रह्मप्रत्यक्षे रूपाद्यपेक्षा नास्ति। अतः हेतुविषयकविचारप्रसङ्गे साध्यविषयकविशेषविचारस्य आवश्यकता नास्ति। अतः परिच्छिन्नत्वमपि मिथ्यात्वानुमितिं प्रति निर्दुष्टं कारणं सिद्ध्यति।

**अंशित्वहेतुविचारः-**

कार्यं स्वोपादानेन सह अभिन्नत्वात् स्वोपादाने अनाश्रितत्वात् च सिद्धसाधनदोषः। अभेदत्वात् कारणस्वोपादाने, पराश्रितत्वात् अथवा स्वोपादाने भिन्नाश्रितत्वात् स्वात्यन्ताभावसमानाधिकरण्यस्य उपपत्तेः अर्थान्तरदोषः।

इयं शङ्का नानुचिता, अत्यन्ताभेदे कार्यकारणताभावः स्वीकारात्। अभेदे ब्रह्मप्रपञ्चयोः अत्यन्ताभेदः, कारणसत्तातिरिक्ता कार्यसत्ता नास्ति, बाधात् अर्थान्तरदोषोऽपि न सिध्यति।

तन्तौ पटः इत्याकारकप्रत्यक्षेण अनुमाने बाधदोषः अस्ति। तत्रोच्यते प्रत्यक्षभ्रम-साधारणत्वात् चन्द्रप्रादेशिकत्वप्रत्यक्षवत् अप्रामाण्यशङ्कया युक्तत्वात् प्रकृतानुमाने न बाध्यते।

समवायसम्बन्धरहितत्वात् पटस्य तन्तौ समवेतत्वं विना अंशित्वं युक्तं नास्ति। तदोच्यते इयं शङ्का नानुचिता, पटे एतत्तन्तुनिष्ठात्यन्ताभावप्रतियोगित्वे सत्यपि एतत्तन्तुसमवेतत्वस्य सत्वात् साध्येन सह अंशित्वहेतोः न विरोधः।

पटः एतत्तन्तुनिष्ठात्यन्ताभावस्य अप्रतियोगी वर्तते, तन्तुभिः आरब्धत्वात्। व्यतिरेकव्यप्तेः आकारः न एतन्निष्ठात्यन्ताभावाप्रतियोगी, तत् एतत्तन्त्वारब्धमपि न, यथा पटान्तरम्। अनुमानेन मिथ्यात्वानुमानं सत्प्रतिपक्षं सिध्यति। तत्र समाधानम् उच्यते न, यत्र एतत्तन्तुनिष्ठात्यन्ताभावस्य प्रतियोगीत्वं तत्र एतत्तन्त्वारब्धस्य अभावेति एवं व्यतिरेकव्याप्तौ एतन्निष्ठप्रागभावप्रतियोगिरूपोपाधेः सत्वात्सत्प्रतिपक्षानुमानहीनं परलक्षयतीति शिवम्।

[9] □□□.□.३ .८ .८

## ❖ ऋग्रन्थसूची-


- अद्वैतसिद्धिः- स्वामी मधुसूदनसरस्वती, ब्रह्मचारी श्री रामेश्वरदत्त, चौखम्बा संस्कृत भारती, वाराणसी।
- वेदान्तदर्शनम्क्र स्वामी विश्वरूपानन्दः, स्वामी चिद्घनानन्द पुरी, उद्बोधनकार्यालयः, सेप्टेम्बर, २०१४।
- गुरुप्रिया(ब्रह्मसूत्रवृत्तिः)क्र श्रीजयेन्द्रसरस्वतीस्वामी, जगद्गुरु श्रीशङ्कराचार्यविद्यापीठम्, वाराणसी।
- ईशादि नौ उपनिषद्क्र गीताप्रेस्, गोरखपुर।
- वेदान्तपरिभाषाक्र धर्मराजाध्वरीन्द्रः।
- अद्वैतसंग्रहःक्र ब्रह्मचारी श्रीचेतनस्वरूप, चौखम्बासुरभारतीप्रकाशन्, २००३।